No. ४७३४

Title भगवंतभास्करे नीतिमयूखः

Author नीलकण्ठभट्टः शंकरभट्टात्मजः

Extent ३० पत्राणि Age x

Subject धर्मशास्त्रम्

नीतिमयूखः

५७ त्रप

॥ अथ नीतिमयूखप्रारंभः ॥

नीति. १

श्री

श्रीहरिस्मरणां देवर्षिवृन्दैः संघातमवाङ्मनसगोचरं। प्रत्यक्षमपि तद्धाम सर्वदा समुपास्महे॥ विद्वत्प्रियमार्गप्रदर्शनार्थं द्विषां वध
वीरवरः पुमान्। श्रीशंकरात्मजो भट्ट इहैकरूपो मीमांसकाद्वैतगुरुश्चकार॥ पितृसौहित्यसंसिद्धिहेतुमुत्क्षाथतत्त्वतः नील
कंठः प्रकुरुते राजनीतिं मयूखकां। तत्र राजशब्दः क्षत्रियमात्रे शक्तो न राज्ययोगिनि। अभिषेकोत्तरभाविराज्ययोगात् प्राग
पि राजानमभिषिंचेदित्यादेः शास्त्रीयप्रयोगस्य क्षत्रियमात्रेपि सद्भावादिति निरणाय्य वेदाधिकरणे। तस्य च विधिवदभि
षिक्तस्य प्रजापालनं धर्म इत्याह मनुः। ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि। सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणं। ब्रा
ह्मसंस्कारो ब्राह्मणोचितः कृतोभिषेकः। अभिषेकविधिश्च विष्णुधर्मोत्तरे। इति संभृतसंभारो राज्ञः सांवत्सरस्ततः। कालेभिषेचनं
कुर्यात्तं कालं कथयामि ते। सांवत्सरोऽस्यातीतवित्। मृते राज्ञि न कालस्य नियमो न विधीयते। तत्रास्य स्नपनं कार्यं विधिवत्तिलसर्ष
पैः। घोषयित्वात्र पौरस्य सांवत्सरपुरोहितौ। अन्यासनोपविष्टस्य दर्शयेतां जनं शनैः। स सांत्वयित्वा तु जनं मुक्त्वा बंधनगांस्ततः
अभयं घोषयित्वा तु कालाकांक्षी ततो भवेत्। अत्र यदा पूर्वराजनि मृतेन्योभिषिच्यते तदा सौ तिलसर्षपस्नानाद्यमघोषान्ते कृते यथास
न्यासनस्थः प्रजाः पालयन्नभिषेककालमाकांक्षेत। प्राप्ते काले वा तमानमाभिषेचयेत्। यदा तु पूर्वराजनि जीवत्येव कारणां
तरादन्योऽभिषिच्यते तदा कालप्रतीक्षां न कृत्वा कालएवाभिषेकः कार्यः। तेनमेव कालमाह नाभिषेचयेत्पश्यै ते [illegible] मासे च भार्गव।

या

नभस्य सुप्ते तथा विष्णौ विशेषात्प्रावृषि द्विजाः प्रावृषो विशेषतो निषेधो गतो तद्भिन्न विष्णुशयनकालाभ्यनुज्ञ र्शनार्थं नैव भौमरि ने रामस्य तु षष्ठी च तथैव चानवम्यां नाभिषेक्तव्यश्च तुर्दश्यां च भार्गव शुक्र वारे शिवेहुत वंशाकंद सप्तपुष्योत थैव चे म त्रा णी प्रशस्तं मेभू मिपालाभिषेचने ॥ वेहूत वंश्रवणाः शाकं ज्येष्ठा । दस्रमश्विनी ॥ कार्यो यो रंद्रशांतिः प्रागेवास्य पुरोधसा ॥ यो रंद्र णे द्वी स्रावव न्नृपते । प्राप्ते भिषेक दिवसे सोपवासः पुरोहितः सितमाल्योपवीतश्च सर्वाभरणभूषितः वेदिमुल्लिख्य मं त्रेण हुत्वा च विधिवन्नतः शर्म वर्म गणांश्चैव तत तथास्य स्य पयनं गणां । आपुष्य मन पंचैव तथैव वापरा जितं । एते पंचग णां त्याग्ने वन्त्यंते संस्मा तवंनं कलशं तथा कुर्याज्ञकांचनं । बृहेर्दक्षिणापार्श्वस्थः श्वेतं चवदनभूषितं श्वेतानुलेपनः स्रग्वी स र्वाभरणाभूषितः । आसनस्थः सुखं पश्येन्निमित्तानि हुताशने । पश्ये पुरस्ते च तथा नृसिंहा देवज्ञकाकुंति पुणा च भूपः सांवत्सरस्याथ सदस्य मुख्यः स दस्य पुरस्य स्य पुरोहितश्च प्रदक्षिणवर्त्म शिखस्तप्त जांबूनदप्रभः र थौघ मेघ निर्घोषी विधूमश्च हुताशनः । अनुलोमः सुगंधश्च स्वस्तिकार सन्निभः वर्द्धमानाकृतिश्चैवनं द्यावर्त्तनिभस्तथा । स्वस्ति कवर्द्ध मानं नंद्यावर्त्तीरा जगहमेदाः प्रसन्नार्चिर्महाज्वालः स्फुलिंग रहितो हितः स्वाहावसाने ज्वलनः स्वयं देवमुखं हविः । पुरा णं तोमहाभागतदास्ते हितं वदेत । हविषश्च पदादद्रौन स्याच्छिमिशिमायिते । शद्रा नुकरणामात्रमेतत्त्वानप्रज्ञे पुष्यमध्येन

नी. ती. माञ्जीरमृगयन्त्रिराः पिपीलिकाश्च धर्मज्ञ तदा कुर्यान्तोयं नये। अंगहासादिन्त्रामे तु वल्केराक्षो जपं वदेत्। तथैव च जपं कूर्यात्प्र
२ रस्याध्यदाहिनि। स्नानं समारभेद्राज्ञो होमकाले पुरोहितः। आदौ तु स्वेछया स्नातः पुनर्द्विजैः समारभेत्। क्रमं प्रयोगे वक्ष्यामि
पुनर्मृद्भिरितिस्थितिः। चित्पाठः पर्वताग्रमृदा तावन्मूर्द्धानं शोधये [illegible] ...न्मेकः। वल्मीकाग्रमृदा कर्णौ वितनं केशवालयात्। इंद्रा
यल्ले मृदाग्रीवां हृदयं तु नृपाजिरात्। करिदंतोद्धृतमृदा दक्षिणं तु तथा भुजं। सरोमृदा तथा पृष्ठं उदरं संगमान्मृदा। नदीकूलद्वय था
मृदा पार्श्वौ निशोधयेत्तथा। वेश्याद्वारमृदाराज्ञः कटिशौचं विधीयते। गजोस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा। अश्वस्था ३५
नात्तथा जंघे रथाज्ञः संशोधयेद्बुधः। रथचक्रोद्धृतमृदा तथैव चरणौ द्वयं। तथैव च करद्वयमिति कैश्चित्स्मृतं बुधैः। मृत्स्नानतः स्नपनीयः
स्यात्पंचगव्यजलेन तु। ततो भद्रासनगतं मुख्यामात्यचतुष्टयं। बलप्रधानं भूपालं अभिषिंचेद्यथाविधि। पूर्वतो हेमकुंभेन
घृतपूर्णेन वाडवः। वाडवो विप्रः। दक्षिणे क्षीरपूर्णेन रौप्यकुंभेन क्षत्रियः। दध्ना च ताम्रकुंभेन वैश्यः पश्चिमतो द्विजः। माहेयेन
जलेनोदक्शूद्रामात्योभिषेचयेत्। माहेयं गोश्रृंगपुछसंबंधि। ततोभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः। कोविदो मधुनारामछंदोगो राम
यः कुशोदकैः। संपातवंतं कलशं तथा हुत्वा पुरोहितः। विधाय वह्निरक्षांतु सदस्येषु यथाविधि। वह्निरक्षामिति [illegible] त्यर्थः। राज्ञ २
श्चाभिषेके तु ये मंत्राः परिकीर्तिताः। तैस्तत्र दद्यान्महाभाग ब्राह्मणानां स्वरेण तु। ते च मंत्राः प्रयोगे ज्ञेयाः। तत [illegible] तो गच्छेद्वेदि

मूलं तद्दैवतं। विभूषितं तु राजानं संस्थितं भद्रकासने। भद्रासनं लक्षणां देवी पुराणो। हैमं च राजतं ताम्रं क्षीरे वृक्षमयं च वा। भद्रा
सनं च कर्तव्यं सार्द्धहस्तमुच्छ्रितं। सपादहस्तमानं च राज्ञो मांडलिकोत्तरात्। वराहसंहितायां। त्रिविधस्तस्योच्छ्रायो हस्तः पादा
धिकोर्द्धपुरुषश्च। मांडलिकानन्तरं डितसमस्तराज्यार्थिनां प्रभुभद्रः। विह[illegible]मन्त्रिरे। शतच्छिद्रेण पात्रेणासौ वरोऽनयथाविधि।।
अभिषिंचेत धर्मज्ञः सम्यग्वेदविशारदः। पात्रोस्यधीरोषधिभिः मृताभिः सुसमाहितः। रथ्ये तिष्ठेति गं धम्मेव आवे स्नानं ब्राह्म
णोति च। वीर्णैः पुष्पैस्तथासीनं राममपुष्पवतीति च। तेनैव चैव मंत्रेणापलैस्त मभिषेचयेत्। आशुः शिशान इत्येवं सर्वरत्नैश्च
भार्गवं। ये देवाः पुरःसदेति कुशाद्भिः परिमार्जयेत्। कः विदवित्ततोयतो रोचनया यथाविधि।। मूर्द्धानं च तथा कंठे गंधद्वारेति सं
स्पर्शयेत्। ततो ब्राह्मणमुख्याश्च नृत्रियाश्च विशस्तथा। शूद्राश्चावरमुख्याश्च नानातीर्थसमुद्भवैः। नादेयैः सारसैः कौपैर्नोला ना
कलशं संस्थितैः चतुःसागरजैर्लीभा रत्नाभैद्विजकल्पितैः गंगायमुनयोश्चैव निर्झरैश्च तथा द्विजैः। छत्रधारी भवेत्कश्चि
त्कश्चिच्चामरधारणापरः। अमात्यमुख्यास्त्वकालं केचिद्दंडधरास्तथा। शंखभेरितिनादैर्वदित्राणां निस्वनेन च। गीतवादित्रघोषेण द्वि
जकोलाहलेन च राजानमभिषिंचेयुः समेत्य सहिता जनाः। सर्वलोकाभिषिक्तस्य संमिश्रजलसंप्लुतं। सर्वैश्चौषधियुतं पुराणं सर्वगंधयुतं
तथा। रत्नबीजसमायुक्तं फलपुष्पसमन्वितं। पूजितं सितसूत्रेणा वेष्टितग्रीवमेव च। पवित्रवस्त्रावकीर्णं सर्वीतं प्रभुविभूषितं। वस्त्राव

व्मीश०३

नीती. ३ कर्तैर्श्रुतिं ब्रुवन्ति त्पाटः विल्वपत्रनुं सादि पुष्पकमलोघाकारतया कल्पितव स्त्रैपितितदर्थः श्रीरद्द्रलतत्वाछं तेन सुदर्शकाचनेवं। आदाप
कल्पशुंभातः स्वर्पसांवत्सरस्त दा। मंत्राव सानेकलशांदघाद्गुरुकुलोद्वह॥ मंत्रा आश्रीत्फन्नरशतं वस्वंतेस्तु रास्त्वाम्नि त्याघा
दघाद्भिषिंचेत्। ततः पश्येन्मुखं राजा दर्पणे वाध्यसपिषि। सो मः सितवस्त्रश्च मंगल्यालंभनं ततः। ततः संप्रजपेद्दिक्षुं श्री ग्रं ८
सूरानश्च समर्चयेत्। राजाद्दौ चार्चयेत्तत्र सांवत्सरपुरोहितौ। मधुपर्केण धर्मज्ञस्तात स्तस्य सदैवविता पद्दव धंकुवीत तस्तस्य
चेवंधनं। पदलक्षणं तु देवीपुराणे। सर्वस्नानमलंकारं रोचनारक्तचंदनं कं। हृद्वा गुलमंगुल्याषड्विंशदंगुलावधि। दंनं वा धं
त्रिवाय मकत्रिकगर्भितं। वत्सेशपलमत्स्य मध्योस्वस्ति कवित्नापके:॥ श्री श्रीवत्सदयाहे मस्वामिदेवीश्रुभान्विते॥ अधंगुलंस
मांगुलषट्कांगुल्यासहितमष्टांगुलमित्यर्थः ततश्चाषड्विंशदंगुलं सप्तांगुलं च द्विवीते नाष्टो पंचदश द्वाविंशतिरेकोन त्रिंश
त्रद्विंशद्वांगुलानि दैर्घ्यं। दैर्घ्यार्द्धेन मध्यो विस्तारः तदर्द्धेनांतयोः। सचव त्रापत श्चतु त्रापतो वा। प … पक्षत्र यावत्सः श्रीवत्सः
श्रीवत्सः दशः त्रिवः दभगोर्द्धषट्दे हेर्वैद्विगुणपामामध्यार्द्धेन पार्श्वविस्तारः सर्वे दिग्भुद्धकांत्वतवि नि मि … पसो वृद्धो। पंचशि राम ३
खोभ्रमियते स्त्रिशिखोपुवराजस्याजमहिष्योः एकशिखः सेन्यपतेः प्रसारद पद्दो विनाशिखया। विघ्नकर्मा ति। व्याघ्रव्यालगजाः
सिंहाश्चाश्वोष्ट्रय हिषोवषः मृगणेषु त्यज्जे दग्नोयदा छे द्दीर्घजीवितं। वनेचराजलचराः हंपिकीटपतंगका … मरणेनु पीघदौ
:तत

गजश्लथं नराहेभोष्वेवं। केवलमोर्गज द द्रपोर्स्मिकर्मणानि बेधारः … ध्वावि
स्त्रारमुका



ङ्गीचिह्नन्वितं। एवं पदध्यानंतरं कार्यमुक्तं विष्णुधर्मोत्तरे। ततः सबद्धमुकुटकाले पूर्ववद्यथोदिते। पराद्ध्यास्तृतकान्ते तमं चैव वध्वो
तेर छदे। ध्रुवा द्यौरिति मंत्रेणासोपवेश्यः पुरोधसा। वृषस्य वृषदंशस्य द्वीपिनश्च मृगेन्द्रहा तेषामुपरि सिंहस्य व्याघ्रस्य
च ततः परं। वृषदंशो मार्जारः द्वीपी द्वीपान्तरगतो व्याघ्र इति तताचरणाः तरस्युरिति केचित्। तत्रोपविष्टस्य तदा प्रतीहारः प्रदर्श
येत्। अमात्यांश्च ततः पौरान्नैगमांश्च प्रलोभ्यराजा।। तथाप्रकृतयः श्रेण्यः यथावदनुपूर्वशः ततो गृहीत्वा वस्त्रैर्मतुरंगकं तको
नमेः गोजादिगृहदानैश्च सांवत्सरपुरोहितौ।। पूजयित्वा ततः पश्चात्पूजयेद्ब्राह्मणांश्चापि। अनेनैव विधानेन येन राजाभि ग
षेचितः ततः मरस्यान्तं संप्रष्टव्य सांवत्सरपुरोधसः ततो ब्राह्मणमुख्यानां पूजनं नु समाचरेत्। गोवस्त्रतिलरूप्यान्नफलैः कांचन
गोरसैः मोदकैः श्वेतपुष्पैश्च महादानैश्च सुव्रत। मंगलालंभनं कृत्वा गृहीत्वा सशरं धनुः वह्निं प्रदक्षिणीकृत्य प्रणिपत्य
तथा गुरून्। पुष्यतो वृषमालभ्य गां सवत्सां च पार्थिवः पूजयित्वा तु तुरंगं मंत्रितेनाभिषेचितं। तमारुह्य ततो नागं पूजयेच्चाभि
भिषेचितं। मंत्रितं ट शिरोकरी स्वयं देवं विदा ततः। आरुह्य राजमार्गेण स्वपुरं तु परिभ्रमेत्। मुख्यामात्यैः ससामन्तैः सान्तःस्
रपुरोहितैः सहितः कुंनुराह्यैरभिगच्छेच्च देवताः तासां संपूजनं कृत्वा नगरं पातिवेष्टितं। प्रविश्य स्वं तु गृहं राजा प्रहृष्टजनवाहितः।
दानमानादिसत्कारैर्गृहीत्वा प्रकृतीस्ततः संपूजितास्तान् सर्वान् विसर्जयित्वा महेश्वकेस्मान्मुदितो महात्मा। विधानमेतत्समवाप्य कां
त्स्नं तु धर्मीव शास्त्राणां विंदध्यादिति। सेन्तोपतस्तु गोपथब्राह्मणे। अथ राज्ञोऽभिषेकविधिं व्याख्यास्यामो बिल्वप्रभृतीन् संभारान् संभृत्य षोडश काल



शान् घोड्गधिवाविनिवल्मीकस्य चमन्तिकां सर्वान्संसर्वस्तान्सर्ववीजानित्त चत्वारः सौवर्णाश्च नारो राजता श्च त्वात स्ताम्राश्च त्वा
नी·ती· रोमृन्मयास्ता न्द्रुढेसर सिवो र्ध्व स्तुतो नामे नामद्दत्पदके नपूरपि त्वा वेदिपृष्ठे संस्थाप्य कुंभे विल्वमेकैकं दद्यात्सर्वान्संसर्वस्ता
४ न्सर्ववीजानि च प्रान्ते प्यामये रथ राज्ञि ते रामु ष्येः स्वस्त्ययनैः सौवर्णेषु संपातान्संश्राव्येः संस्तिकीयेश्च राजतेषु भेषजैर्वैवस्वतेहो
पैस्ताम्रेषु संवेशसंवर्गीम्यानातीयैः प्राणस्त्रक्ते नच मन्मयेषु नतस्तावकलशान्गृहीत्वास्तीर्णेर्ये पवित्रियेरभिषूयेराजानमभिषि
चेतान्समिमिंद्रमेचवर्धयन्त्वित्र्पंमरूतिसिंहासन मारूढमाभिमंत्रयेत एवमभिषिक्तस्करसान्त्राश्रीयाद्विप्रेभ्यश्च ददार्घ्यौंजोसह स्त्रंसदर्पि
भ्यः कर्त्रेग्रामवरंविपुलंयशःप्राप्नोति भुंक्तेच तांजितशत्रुः सदाभवेदिति ॥ अन्नेतंडुलादिपदुहंतनप्ररोहति बीजंप्ररोहार्हंत्रीह्यादि
र्ध्वस्ककुम सुखंयेयांते दुर्ध्वस्कृतः नामेना मंत्रमयात्रपरा ज्ञिता मंत्राः प्रयोगेवत्तंते अत्रच वहवचनेत्र पस्त्र पोया ह्याः कपिंजलन्यायात्
संवेशसंवर्गप्राणस्त्रंत्रेद्धे केकए वेतिना नचरराः अथ प्रयोगः तत्र पदा पूर्व राजनिम ते न्योमिषिच्यतेनदासां वत्सर पुरोहितोनंनित्य
स्नानप्रकारेणातिलसर्षपैः संस्नाप्यराष्ट्रंयंराजेतितस्यजनयमुद्दिष्य एवंराज्ञोस्तनादासनांनर उपविश्यमंत्रादिकं नगरजनांश्चदर्शयेत्
राजाचतान्सत्कृत्यकारागृहनिगडवद्धान्मुक्त्वाभयंदत्वातेदासनस्थएवराज्यं कुर्वन्नकालं प्रतिक्षेत ॥ १ ॥ नेचाभिषेककालेप्यात्मानम राम
भिषिंचयेत् ॥ पूर्वस्मिन्राजनि जीवतिकारणांतरेणान्याभिषेके तु न कालप्रतिक्षांतो विधिः ॥ किंत्वभिषेककाले भिषेकएव अभिषे ४
कदिनात्पूर्वमेवकस्मिंश्चिछुभेदिनेऐंद्रीशांतिंकुर्यात् ॥ सा चैवं पुरोधाः सुदिनेमासपद्माद्युक्तिः तत कारि

ण्म ३

श्री.म. [redacted] ष्यमाणराज्याभिषेकांगतयाऐंद्रीशांतिंकरिष्य इतिसंकल्पग

५ णेशपूजास्वस्तिवाचनर्त्विग्वरणानि कुंडलांगुलीयकवासः दिभिस्तत्पूजांचकुर्यात्। ततः अव्यसश्चव्यवसश्चविलंवि

ष्यामिमापया। ताभ्यामुद्धृत्यवेदमथकर्माणि कृ हे। प्रपद्येपरमुंतरपाहयोषमहिसन्न इतिदर्भंगृहीत्वा। ति ॐ बधीहि

तुयर्वमिति मत्वा तुपरिवर्हिर्लुनाति। ॐ श्री प्रस्ते मेवर्षाणीशरद्वे मंतः शिशिरोवसंतः। ऋतवस्तविहितामायनीरहो

रात्रेपर्थवीनोदुहाथावमिति भुवमुपस्थाय। विमिधव पयस्वतीघृताचीदेवानांधेनुरपस्यगोषा। इंद्रः सोमंपिवतुक्षेमो

ऽग्निः प्रस्तोतुविमृधोनुदस्वेति द्वादशांगुलां शमीसमिधमनुमंत्रयते। अथर्वेदिः। सात्र्यावषट्सर्मिदायता पूर्वपश्चिमयोः। पश्चि

मदिशिचतुः समिद्विस्तारा पूर्वपश्चिमयोः प्रत्येकंसमिद्रूपं स्का मध्यभागे दक्षिणोत्तरयोः प्रत्येकमर्धसमित्याजेनसमित्त्रयपवि स

स्ताराग्निसंनमनक्रमेण सार्द्धसमित्त्रयविस्तारा। तन्मध्ये पश्चिमतः समित्त्रयंपूर्वतः समिन्मात्रंत्यक्त्वासमिद्रूपचतुरस्राउन्नवेदिः राम

साचकुंडात्मिकास्थंडिलात्मिकावा। उन्नरवेदिः प्राच्यां दक्षिणोत्तरयोश्चवेदितोर्द्धसमिन्मितेनवभूमिस्तिष्ठति। ततईशानकोणस्त ५

दक्षिणाक्रमेणवालुकाभिः स्तूपंमहावेदिसामरेखांकुर्यात्। ततः ॐ वृहस्पतेपरिगृहाणसुवेदिं गावोदेवाः सदनानिसंतु। अस्यां

वर्हिः प्रथतांमाध्वंतरर्हिंस्वाराणः पृथिवीदेवीदेव्यस्तु। इतिरेखांत्रिरनुमंत्रयेत्। ततः प्रथममहावेदिमध्ये। श्री मेवर्षाणीशरद्वे

मंतः शिशिरो वसंतः। कृतवस्ति विहायनीरहोरात्रे एथविनोदुहाना यत्ते भूमे विखनामि क्षिप्रं तदपिरोहतु मा ते ष्मर्म विमृग्वरि माते
हृदयमर्पिषं इति भूमिखननं। ततः ॐ यस्त्वा कृन्तत्तत्राप्सरया तिप्रजापतिः प्रथमजा ऋतस्येति रवाने तपूरणं। ततः ॐ त्व
मस्या वपनी जनानामदितिः कामदुघा पप्रथाना। मानेति वालुकाभिर्महावेदिं प्ररयति। पुनः कुशाग्निकांस्कंडिल्लाग्निकांवी
त्तरवेदिं परिमाय पूर्ववद्रेखां कृत्वा बृहस्पतिपरिगृहाणेति मंत्रेणात्रीन्वारान्संस्थाप्य पूर्ववदनुमंत्रयेत्। ततः असंबाधं
वध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु नानावीर्या ॐषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः इत्युत्तरवेद्यां
वालुकाविस्तारयति। ततो यस्यां चत्तस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः या बिभर्ति बहुधा प्राणदेजत्सा
नो भूमिर्गोष्वप्यन्ने दधात्विति वालुकाभिर्वेदिं चतुरस्रां करोति। ततो देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
प्रसूतः प्रशिखा परिगृह्णामीत्यनेन लेखनीं गृह्णाति। ततः इंद्रः सीतां निगृह्णातु तां पूषाभिरक्षतु। सा नः पयस्वती
दुहामुत्तरामुत्तरां समां इत्युत्तरवेद्यां आग्नेयकोणादारभ्य वामावर्तेन चतुर्दिक्षु लेखाः कृत्वा पुनरप्याग्नेयकोणादार
भ्य ईशानकोणपर्यंतं पूर्ववत् उल्लिखाम मध्ये पि पूर्वायास्तिस्रो लेखाः करोति। तस्यां व्रीहियवौ तत्र विकीर्य एवं घेरा भूमिः पृथि
वी वतासा नो दधातु भद्रया प्रिये धामनि धामनीति संप्रोक्ष्य। ॐ यस्यामन्नं व्रीहियवौ यस्या इमाः पंच कृष्टयः भूम्यै पर्जन्यपत्न्यै नमोऽस्तु व

षमिषसि। इति मुंचेन त्वा। ॐ त्वामग्ने भगवो नयंता मांगिरसः दनं श्रेय एव हि। विश्वकर्मा पुरए तु प्रजानां विद्धि यां यं यथानं मनुते
नी.म. दिशाम स्वस्ति भद्रं यं यथामनुते दिशामः श्रेयं यं यथामनुते दिशामः स्वस्तिं यथामनुते दिशाम इत्यग्नि संनिधापनं। ततो भद्रो
६ नव श्रेयो भव स्वस्त्यो भवेति द्वी। हिपवो कांस्या दिपात्रस्थो वेवाग्नो प्रज्वित्य ॐ विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा
जगतो निवेशनी। वैश्वानरं बिभ्रती भूमिरग्निमिंद्र ऋषभा द्रविणो नो दधात्विति कत्तवे धामग्नि स्थाय पति। ममाग्ने वर्चो
6 विहवेष्वस्तु वयं त्वें धानास्तन्वं पुषेम। मामहांनम्ये तां प्रदिशश्च तस्रः स्त्वयाध्यक्षेण पृतना जयेमिति समित्रयं च जुहुयात्।
एवं व्रतयग्रहणां तं कृत्वा व्रतपतद्वत्येकां समिधं सत्वा हाकारवर्जं हुत्वाग्नेरीशान भागे सोतिसवर्णरौप्यं ताम्रं वा जलपूर्णं
गंधसर्वौषधि हिरण्यं च पल्लवयं च वल्कं पंचगव्यं पंचामृतं सप्तमृत्तिका पुष्प फल पंचरत्न सुवर्णा शकलवासो युतं कलशं
मंत्रेणेषु संस्थाप्य तदुपरि अग्नेः पुरस्ताज्ञो चर्ममात्रं गोमयेनोपलिप्य तदहतेनोदग्दशेन वाससा संछाद्य तदुपर्यष्टद
त८६३ लं पद्ममालिख्य तत्र वा पल्लतदर्हं सुवर्णानिर्मितमिंद्रं संस्थाप्य राज्ञोपचारैः पूजयेत्। तत्रेमा ऋचा पठेदिति स्नानं। मधुपर्कं राम
कुंडलांगुलीयकाद्याभरणाछत्रचामरध्वजयताकादीन्यर्पयेत्। त्रातारमिंद्रमिति पुष्पांजलिं। ततस्तत्र[illegible]पवित्रे कृत्वा वि ५
ष्णोर्मनसा पूते स्थ इति पवित्राभ्यामिध्म प्रोक्षणं। विष्णोर्मनसा पूतमसीति हुतिं पं। देवस्त्वा स[illegible]त्वा व छिद्रेण।

त्वा पवित्रेण शतधारेण सहस्रधारेण सुप्वोस्तु नामीति तृतीयं । चतुर्थं तूष्णीं । अग्ने त्वा जुष्टं प्रोक्ष्याम्यं नेनेध्मसंनि
धायनं । अथेध्ममादाय ॐ अग्निर्मूर्ध्ना मोषधीष्वग्निमा यो विभर्त्यग्निरश्मसु । अग्निं नः पुरुषेषु गोष्वश्वेष्वग्नयः
। १ । अग्निर्दिवक्षापततत्याग्ने दैवस्योर्वंतरिक्षं । अग्निमर्त्तास इंधते हव्यवाहं घृतप्रियं । २ । अग्निवासाः पृथिव्यसितज्ञोसि वि
श्वीमं तं संशितं मा कृणोतु । भूम्यां देवेभ्यो ददति यज्ञं हव्यमरं कृतं । भूम्यां मनुष्या जीवंति स्वधयान्नेन मर्त्याः । सा नो भूमिः
प्राणमायुर्दधातु जरदष्टिं पृथिवी मा कृणोतु । एतमिध्मं समाहितं जुषाणो अग्ने प्रति हर्य होमैः । तस्मिन्त्विधे मसुम
तिः स्वस्तिं प्रजां च चक्षुः पशून्त्समिद्धे जातवेदसि ब्रह्मणाः ४ । असौ तत्वा णोधारयं तमग्ने पुनज्मि त्वा ब्रह्मणा वांदेव्ये
नारी दिष्यस्मभ्यं द्रविणो हमद्रूपे मं वो वो हविर्दिदिवतास्तु । ५ । एभिः पंचभिर्मंत्रैर्जुहोति । ततः त्वं भूमिमत्येष्योजसा त्वं
वेद्यां सीदसि चारुरध्वरे । त्वां पवित्रमृषयो भरंतस्त्वं पुनीहि दुरितान्यस्मिन्निति वर्हिः प्रोक्षणं । ततः कृष्णरायं प्रस्तरोसि व
मो स्तृदेवाय प्रस्तरायेति दक्षिणतो ब्रह्मासनं निधाति । ततो स्मिन्कर्मणि त्वं भूपते भुवनपते भुवांपते महतो भूतस्य पते ब्रह्मा
णं त्वा वृणीमहे । इति वरणमंत्रं ब्रह्माणमुद्दिश्य पकन्नीपठति । ततः अहं भूपतिरहं भुवनपतिरहं भुवांपतिरहं तो भूतस्य पतिस्तद् हं मनसे
प्रब्रवीमि मनो वाचेवा गायत्रीगायत्र्युष्णिह उष्णिगनुष्टुब्धु बृहत्यै बृहती पंक्त्यै पंक्तिस्त्रिष्टुभे त्रिष्टुब्जगत्यै जगती प्रजापतये प्रजापतिर्वि

नी.म.
७

अभ्योदेवेभ्य ॐ भूर्भुवः स्वर्जनदोऽग्नीध्र ब्रह्मा जपति। ततः अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीदयोऽस्मत्पाकरः इति ब्रह्मा
ब्रह्मासनमभिचीक्षते। ॐ निरस्तः परावसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति ब्रह्मासनाद्
दे तृणं निरस्यति। अथासनमालभ्य जपति। इदमहमर्वावसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्ट-
स्य सदने सीदाम्यापूर्तस्य सदने सीदामि मामामच्छिद्रे वर्हिः स्वासस्थं त्वाध्यासदेयं तन्मामिदं मनामिशोकं। विमृग्वरी पृथिवी
मावदामि नृमणां भूर्मि ब्रह्मणा वावृधानां। ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि निषीदेम भूमे। अथोपविश्यासने
ब्रह्मा जपति। बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यति बृहस्पते यज्ञं गोपाय। ततः प्रउद्धृतउत्रिवतः शाकेपं यातं मेद्या
वापृथिवी धानः इति द्यावापृथिव्यौ समीक्षते। अथ होता वर्हिर्मुष्टिमादाय स्तरणं मित्रीन्वायानाग्नेय त्रीन्दाक्षिणात्स्त्री
न्याग्निमायां सकलां स्त्रीन्वायव्यां पूर्वतो मूलानि च्छादयं स्त्रीनुत्तरतस्त्रीनीशाने पश्चात् समागच्छति दक्षिणोत्तरं करोति।
इति भाष्यं। ब्रह्मा च परिदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा परिस्तरणामि इति पठित्वा। राम
आग्नेयकोणादैशान पर्यन्तं पंक्तित्रयं पंक्तिर्वा यान्दर्भान् मूलाग्रास्तरणाति। एवं प्रथमास्तरं दर्भाग्राच्छादितमूलानुत्तरोत्तरं द ७
र्भानास्तीर्य नैर्ऋतिकोणादारभ्य पूर्ववत्पंक्तित्रयेण प्रागग्राण्याग्नेय पर्यन्तं। तथैव नैर्ऋतिकोणादारभ्या[illegible]पर्यन्तं तथैवापव्य

कोराग्दारभ्यप्राग्वदैशानपूर्वयंतंपरिस्तीर्यैवरमीशानपरिस्तीर्यादिमग्निनुप्रथमतईशान[illegible]र्यादिमग्नि
मधःस्त्रुपपेतः। ततः हविषात्वाजुष्टंप्रोक्षामीत्यनेनास्तीर्यादिमभ्युक्षणं। अथ होताआस्तीर्यादिमग्निमेकांग्निहमग्ना
दापतान्नस्वासनेसमास्तीर्य। अहेदेधिषव्येरूत्यनेनस्वासनमन्वीक्ष्तेनिरस्तइत्यादिनात्तरांनिरस्यति। आसन
मालभ्यइदमिहमित्यादिजपति। उपविश्यबृहस्पतिर्ब्रह्मेत्यादिजपति। परीत्याग्नेपुरंवपंविघंसहस्पधीमहि
धषइर्योदिवेहंतारंभंगुरावतइति। उपहूतइत्यादिनाद्यावापृथिव्योसमीक्षते। ततः ॐ पत्याग्नेब्रह्मणा
णास्पतिःसत्यधर्माआदीधरद्देवस्पसवितुःसवे। इत्युदपात्रमग्नेरुत्तरतःस्थापयति। तत्रचपवित्रेनिक्षिप्य
ॐ ईहेतदेवीरमतंवसानाहिरण्यवर्णा अनवघरूपाः आपःसमुद्रोवरुणाश्चराजासंयातभागान्हविषोजुषं
तां॥ इंद्रप्रशिष्टावरुणप्रसूताआपःसमुद्रादिवमुद्वहंतु॥ इंद्रप्रशिष्टावरुणप्रसूतांदिवस्पृथिव्याःश्रेयमाव
हंतु। अनेनमंत्रेणोदपात्रेउदकंक्षिपति। विनीनष्टतमाजामग्नावधिश्रित्यपरित्याग्नेपुरंवपंविप्रंसहस्पधीमहि।
धषद्द्वर्योदिवेद्विदेहंतारंभंगुरावतइतिविः पर्यग्निकृत्वाउदगुद्वासपश्चादग्नेरासाद्यपवित्राभ्यामुत्पुनाति। ततोदर्भेत्र
पेणास्त्रुवसंमार्जनं। ततोनिष्टप्तंरक्षोनिष्टप्ताअराप्तयःप्रत्युष्टंरक्षःप्रत्युष्टाअरातयइतिस्त्रुवप्रतपने। अथॐ विष्णोर्हस्तो

सिदन्ति राजतः पृष्ठोदं तं बृहस्पते ॥ तं त्वा दं स्रुव मादद्दे देवानां हव्यवाहनं । अ यं स्रुवो निदधाति होमं हुताऽजस्त्रुव्दुहे
नी॰म नरसाज्जागते । सर्वं य त्तस्य सम नक्ति विष्ठ्वा हं स्पत्नोषि शर्मणा देवो नेति स्रुवा भिमंत्रणं । ततः संस्कृत मेव घृतं स्रुव
३८ मभाग्नेः पश्चात्स्थापिताज्य धानी नाम कपात्रां तरे स्रुवेण कुर्यात् । ॐ भूः शं भूत्यै त्वाग्र ह्णे भूतये इति प्रथमं ग
ह्णाति ॐ भुवः शं पुष्टै त्वाग्र ह्णे पुष्टये इति द्वितीयं । ॐ स्वः शं त्वाग्र ह्णे सह स्वपोषाये ति तृतीयं ॐ जनः शं त्वाग्र ह्णे
परिमिति योषाये ति चतुर्थं । ततः स्रुवेण तद्द्युं स्रुहुयात् । ॐ अग्ना वग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्ति
पाउ । नमस्कारेण नमसा ते जु ● होमि मा देवानां मिथुया कर्म भागं स्वाहा । हृदा पूतं मनसा जातवेदो विश्वानि देव वयुना
नि विद्वान् । सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यं स्वाहा । पुरस्ताद्य ज्ञो वहतां तवेदाग्ने विद्धि क्रियमा
णं यथेदं । त्वं भिषग्भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेमस्वाहा । यज्ञस्य चक्षुः प्रभृतिर्वाचा श्रोत्रेण मनसा जु तु संस
होमि । इमं यज्ञं विततं विश्वकर्मणा देवा यान्तु सुमनस्यमानाः स्वाहा । इति हुत्वा । ॐ इहैवेर हते स्वर्गदि देवश्च मपे भ्युत्क्रे राम
रामित्विषी मते । सनः स्थिरान्चलवतः कृणोतु ज्योक्तरोजीवातवे त्पदक्षात्वमग्न पे स्वाहा । इन्त्युत्तर पूर्वार्द्धे । अयं दक्षि ३८
णा पूर्वार्द्धे । ॐ त्वं सोम दिव्यो न्चक्षाः सुगं अस्मभ्यं पथो अनु ख्यः । अभि नो गोत्रविदु ष्कर वनेशो दृष्मते ... दुशानी द्विगा

यसोमायस्वाहा। इत्याज्यभागौ हुत्वाभ्याताननहोमं कुर्यात्। नवधा।। सविताप्रसवानामधिपतिः सोमं... त्वत्रास्मिन्ब्र
ह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा।
(पवित्रे प्रसावा नामधिपतेये) अग्निर्वनस्पतीनामधिपतिरित्यादि। एवं सर्वत्रोह्यं। २ द्यावादातृणामधिपतीनि मावंतां:
३ वरुणोपामधिपतिः ४ मित्रावरुणौ वृष्ट्यात्राधिपती ५ मरुतः पर्वतानामधिपतयस्ते मावंतु। ६ सोमो वीरुधाम
धिपतीते [illegible] ति ७ वायुरंतरिक्षस्याधिपतिः ८ सूर्यश्चक्षुषामधिपतिः ९ चंद्रमा नक्षत्राणामधिपतिः १०
इंद्रो दिवोधिपतिः ११ मरुतां पिता पशूनामधिपतिः १२ मृत्युः प्रजानामधिपतिः १३ यमः पितृणामधिपतिः १४
पितरः परे ते मावंतु। ततावरे ते मावंत्विति पूर्ववत्। ततस्ततामहास्ते मावंत्विति पूर्ववत्। अथोत्तरांगानि तत्र पूर्ववत्
सप्तदश हुत्वात्मकं मभ्याताननहोमं कृत्वा शुक्लपक्षश्चेत्। ॐ पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगा
य। तस्यां देवा अधिसंवसंतो महित्वा नाकस्य पृष्ठे समिषा मदेम स्वाहेति जुहोति कृष्णपक्षश्चेत्। यत्ते देवा अकृण्वन्भाग
धेयममावास्ये संवसन्तो महित्वा। तेनानो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुवीरं स्वाहेति। अथ आकूत्यै स्वाहा। कामा
य त्वा स्वाहा। समृध्यै त्वा स्वाहा। आकूत्यै त्वा कामाय त्वा समृध्यै त्वा स्वाहा। ऋचां स्तोमं समर्धय गायत्रेण रथंतरं। बृहद्गायत्र

मा त्वं जुहुम त्वं नो अस्तु वयं स्याम पतयो रयीणां स्वाहा इत्युपस्तीर्य होमः। त[...]नरूत्त रस्त्वं र्हं आदि
नामपि

नी·म· वर्त्तनि स्वाहा। इत्याहुति पंचकं जुहुयात्। इति समृद्धि होमः ततः ॐ पृथिव्यामग्नये समनमं त्स आर्ध्नोति। यथा पृथिव्या
मग्नये समनमन्नेवा मह्यं सन्नमः संनमंतु। ततः ॐ पृथिवी धेनुस्तस्या अग्नि र्वत्सः समेग्निना वत्सेनेषमूर्जं कामं दुहां।
८ आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। अंतरिक्षे वायवे समनमत्स आर्ध्नोत्। यथांतरिक्षे वायवे समनमन्नेवा मह्यं सन्नमः
१ संनमंतु। अंतरिक्षं धेनुस्तस्या वायुर्वत्सः। समे वायुना वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा।
दिव्यादित्याय समनमत्स आर्ध्नोत्। यथा दिव्यादित्याय समनमन्नेवा मह्यं सन्नमः संनमंतु। द्यौर्धेनुस्तस्या आदित्यो
वत्सः। सा मे आदित्येन वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। इत्याहुति चतुष्टयं संनति होमः। प्रजापते न त्व
देतान्यन्यो विश्वारूपाति परिभूर्जजान। यत्कार्य्या मगन्म यद्यं क्रेवाम नदनुवीढुं। अग्निर्विद्वान्स यजात्स इद्धोता सो ध्वरान्स ऋ
तून्कल्पयाति अग्नये स्विष्टकृते स्वाहा। इति मंत्रेण जुहुयादिति स्विष्टकृत। अथैकादश प्रायश्चित्ताहुतीर्जुहोति। स्वाहेष्टेभ्यः
स्विस्वाहा। वषणिनिष्टेभ्यः स्वाहा। भेषजं स्विष्टे स्वाहा। निष्कृति दुरिष्टे स्वाहा। देवीभ्यस्तनूभ्यः स्वाहा। अयाश्चाग्नेस्यनभिशस्ति राम २
श्च सत्यमित्त्वमया असि। अयासा मनसा कृतो यास्मान्व्यमहिषः स्वाहा॥ ॐ स्वाहा। भूः स्वाहा। भुवः स्वाहा। [...] स्वाहा॥ ॐ भूर्भु
वः स्वः स्वाहेति प्रायश्चित्त होमः ततः ॐ यन्मे स्कन्नं मनसो जातवेदो यद्वा स्कन्दं हविषो यत्र यत्र। उत्सृष्टोति पृ[...]होमि सत्याः सं

यजमानस्यकामाःस्वाहा।पुनर्मैत्विंद्रियंपुनरात्माद्रविणांब्राह्मणांच।पुनरग्नयोधिष्ण्यायथास्थानमेवकल्पंतां।इमिहैवस्वाहे

तिस्कन्नहोमः।यदस्मृतिचकृमकिंचिदग्नउपारिमचरणेजातवेदः।ततःपाहित्वंनःप्रचेतःसुभेसखिभ्योयत्रोमृतत्वम

स्तिनःस्वाहा।इत्यस्मृतिहोमः।ततःयदद्यत्वाप्रयतियज्ञेअस्मिन्होतश्चिकित्वन्नवृणीमहीहा।ध्रुवमयोध्रुवंहुताश

विघ्नप्रतान्यज्ञमुपयाहिसोमस्वाहा।समिंद्रणोमनसानेषिगोभिःसंसूरिभिर्हरिवःसंस्वस्त्या।संब्रह्मणादेवहितं

यदस्तिसंदेवानांसुमतौयज्ञियानांस्वाहा।यानावहउशतोदेवदेवांस्तान्प्रेरयस्वेअग्नेसधस्थे।यज्ञिवांसःपपिवांसोम

धून्यस्मेधत्तवसवोवसूनिस्वाहा।सुगावोदेवाःसदनाअकर्मयआजग्मसवनेमाजुषाणाःवहमानाभरमाणाःस्वा

वसूनिवसुंधर्मंदिवमारोहतानुस्वाहा।यज्ञयज्ञंगच्छयज्ञपतिंगच्छ।स्वांयोनिंगच्छस्वाहा।एषतेयज्ञोयज्ञपतेसहसूक्त

वाकःसुवीर्यःस्वाहा।वषट्कृतेभ्योवषडहुतेभ्यःदेवागातुविदोगातुंवित्वागातुमितस्वाहा।इत्याहुतिसप्तकंसंस्थितिहोमः।ततः

समनसस्पतइमंनोदिविदेवेषुयज्ञं।स्वाहा॥दिविस्वाहा।पृथिव्यांस्वाहा।अंतरिक्षेस्वाहा।वातेधाःस्वाहा।इत्याहुतिपंच

कंहुत्वा।आज्यस्थालीघृतमुत्तमंचतुर्वारंस्रुवेणगृहीत्वाआज्यधान्यांसंस्थाप्यस्रुवेणैकवारंतूष्णींजुहुयात्।इतिसमान

होमः।अधस्तरणाक्रमेणाबर्हिष्कुशापवित्रगुणीकृत्याज्यधान्याघृतेनाभ्यनक्ति।पृथिव्योत्वेतिमंत्रेणप्रथमंमूलेयुनक्ति।अंतरिक्षा

नी॰म॰ पत्रेतिमध्ये पुनक्ति। दिवेत्वेति अग्रंपुनक्ति। एवंत्रिःकृत्वा ॐ संवर्हिरक्तंहविषिविषाघृतेनसमिंद्रेणावसुनासंमरुद्भिः संदेवैर्वि
श्वदेवेभिरक्तमिंद्रंगच्छतुबर्हिः स्वाहाइत्यनेनबर्हिर्जुहोति। अथसंस्रावभागास्तविषादहतः प्रस्तरेष्ठावर्हिषदश्चदेवाः
१० इमेयत्तमभिविश्वेगृणंतः स्वाहादेवाअमृतामादयंतांस्वाहाइतिसंस्रावभागहोमः। स्रुवोसीतिस्रुवंप्रागग्रंहुंनिदधाति।
10 स्रुवप्रतिष्ठापनांतेइंद्रंसंपूज्यचंदनपुष्पधूपदीपनैवेद्यतांबूलदक्षिणाभिः पूजयेत्। आमारमिंद्रसितिपुष्पांजलि
दद्यात्। ततोग्न्यायतनस्यसमंतात् दिक्षुविदिक्षुचमाषभक्तवलीन्स्त्रीपात्रादिकपालेभ्योदद्यात्। त्रातारमिंद्रमितिइं
द्रायसांगायसपरिवारायसायुधायसशक्तिकायएषमाषभक्तवलिर्नमः। भोइंद्रदिशांरक्षवलिंभक्षयजमानस्या
युःकर्ता क्षेमकर्ता शुभकर्ता शांतिकर्ता भवेतिपुष्पाक्षतजलानिपूर्वाभिमुखः समर्पयेत्। एवंसर्वत्र। अग्नेर्मन्वइतिआ
ग्नेये। नमोस्तुतेनिर्ऋतइतिनैर्ऋत्ये। येयज्ञादितिपश्चिमे। वायोःसवितुरितिवायव्ये। यउत्तरतइत्फईशानात्वाईशाने। इति
दिक्पालेभ्योवलिंदद्यात्। ततोमहावलिंकुंकुमादिरक्तपुष्पादियुतंसदीपंसदक्षिणंक्षेत्रपालायदद्यात्। क्षेत्रियात्वेतिक्षेत्र राम
स्यपतिना। क्षेत्रपालायभूतप्रेतपिशाचराक्षसशाकिनीडावेतालादिवारयुतायेत्यादि। इमंवलिंमद्दूरादुर्बलब्राह्मणेन १०
वाचतुष्पथेवान्यत्रवानाययेत्। ततःप्रक्षालितपाणिपादआचांतोदेशकालौस्मृत्वाकृतस्याःऐंद्र्यांःशां [illegible] दशाक्षिध्यर्थंग्रा

हुतिं होष्यामीति संकल्प्य स्रुचि द्वादशगृहीतं चतुर्गृहीतं वाज्यं कृत्वा वस्त्रपुतनालिकेरादिफलचंदनादिपुं[illegible]समकृति[illegible] रनिधाय पूर्णा
हुतिं अग्निर्यत्तदित्येतैस्त्रिभिः सूक्तैः राज्ञा न्वारब्धः पूर्णाहुतिं हुत्वा कर्मशेषं समापयेदाचार्यः विमुंचामीत्यादि समिध
त्रय होमः तेजोसीति मुखं निमार्ष्टि। तन्निरोनाग्निरेत्रीन्विष्णुक्रमान् क्रमते विष्णोः क्रमोसीति। सूर्यस्यावृतमित्य
भिदक्षिणमावर्त्तते। अगन्मस्वरित्यादि मीरते। इदं दूस्पव च सावयमिदं दूस्पव रूणास्प च॥ ब्रह्मणास्त्वा पितमात्रं पु
न रूह्णाप्यामसि। अपरेणाग्निमुदपात्रं परिदत्योत्तरेणाग्निमायोहिष्ठा मयोभुव इत्यादिना मार्जयित्वा बर्हिर्विष
न्यं जलौ विनयति। समुद्रं वः प्रहिणोमीति। वीरपत्न्य हं भूयासं। यद्वा यजमानस्तदा वीरपुरुषो हं भूयासमिति मुखं वि
मार्ष्टि। व्रतानि व्रतपतइति समिधमादधाति। सत्यं त्वर्त्तेनेति सह हविर्भिः पर्युक्ष्य इदं हविरुच्छिष्टान्युद्वासयति। प्रणीया
त्रं दक्षिणा। ब्रह्मोत्थापनं उत्तिष्ठ ब्रह्मणस्पत इति। यस्मात्कोशा दितिनमस्कारः॥ ततः कलशोदकेन शांत्युदकेन च
दूर्वापल्लवैरुदङ्मुख आचार्यऋत्विजश्च तिष्ठंतः प्राङ्मुखं सकुटुम्बमुपविष्टं यजमानं मभिषिंचेयुः अभिषेके पत्नी
वामभागे। पवित्रं शतधारं। प्रपंते नःपापमिन्नमीति च तस्त्वः हिरण्यवर्णाः। एवमभिषेकानंतरं सर्वौषधीभिरनुलिप्य शु
द्धोदकेन स्नात्वा परिधत्तेतिवाससी परिधाय स्रुक्माल्यां वरानुलेपनः सपत्नीको यजमानः आचार्यादीन्संपूज्यतेभ्यो दक्षिणां

दद्यात्॥ ब्राह्मणो दश गा दद्याद्दनड्वाहं तथोधिकं। सिराधिकं ततो वैश्यस्तथा प्राहो दशाको द्वपी राजा दद्याद्ध्वंर्यामं सम्यग्घोयजन

नी॰म॰ ११ तथा। यथोक्तां दक्षिणां दद्यात्सकलं फलमश्नुते। सकलं फलमश्नुत इति। अथेत्पादिसमयमुच्चार्य कृतस्यैश्वाभ्युदयशांतिक

र्मणः प्रतिष्ठासिद्ध्यर्थं एकादशधेनूरुद्रदेवत्या अमुकगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे। एवमनडुहं ग्रामभूमिहस्त

श्वरथरत्नादि दद्यात्॥ एवं दक्षिणां दत्वा स्थापितदेवतापूजनमस्कारान्कृत्वा आवाहनं न जानामि अपराधसहस्राणि। यस्य

स्मृत्येति पठित्वा यांतु देवगणा इति पीठदेवता विसर्ज्य प्रतिमा पीठं सोपस्करं आचार्याय दत्वाग्निं संपूज्य गच्छ गच्छ सुरश्रेष्ठे

ति विसृज्य यथाशक्ति ब्राह्मणान्भोजयित्वा चतुर्भिश्चतुर्भिश्चेत्यादि यदेत। इति पुष्टिशांतिः॥ अभिषेकदिने च कृतनित्यक्रि

यो दर्भपाणिः राजा प्राङ्मुख आसन उपविष्टः पंच देवता ध्यात्वा न प्रस्तुत्य मासपक्षाद्युल्लिख्य सकलराष्ट्रवश्यताकामो हं सांव

त्सरपुरोहिताभ्यामात्मानमभिषेचयिष्ये इति संकल्प्य गणेशपूजां स्वस्तिवाचनमात्रकावसोर्धारां वृद्धिश्राद्धं नि कृ

त्वा सांवत्सरपुरोहितौ त्रीन् ऋग्यजुर्विदो विप्रान् त्रिपवेशनमात्यान् सामगं चैकं वि... कंऋत्पत मन्त्रे दृष्टिं राम॰ ११

दं कृत्वा मधुपर्कं कुंडलकेयूरकटककंठाभरणांगुलीयकवस्त्रादिभिस्तान्संपूज्य चतुर्वर्ण मुख्यानुपवेश्य प्रेतात्रय पूर्वे दि

ने कृतोपवासः पुरोहितः सितमाल्यचंदनवासाः सौम्यो होमदेशं परिकल्प्य तस्य दक्षिणतोरणाकदल... मंडितापांस्नाने

शालायांव्रीहिषुपर्वेषुवासोवर्णतनवंकलशंपथाविधिसंस्थाप्य यथासंभवमनेकतीर्थजलेनापूर्य सर्वौषधिसर्वगंध
सर्वरत्नसर्वबीजफलक्षीरिवृक्षत्वक्क्षीरीलतापल्लवान्स्वावहुपिः सितवस्त्रैर्माल्यादिभिश्चावेष्टितं तत्समेपे एकंपञ्चगव्य
पुतजलपूर्णंमिनमंपंचपत्तिनपूर्णंहैमंकुंभंदुग्धेनराजतंदध्नाताम्रंमधुनामार्त्तिकंकुशोदकेनचमार्जिकंशातक्लिद्दंव
सोवर्णमन्यांश्चयथालाभंनदीसरः कूपवतः समुद्रोदकपूर्णान्मार्त्तिकान्तबाधितास्थापयेत्। सर्वेषांचकलशा
नांउच्चषोडशांगुलान्। वेपुल्यंद्वपंचाशदंगुलंसूत्रवेष्टनयोग्यं। ततः पुरोहितोहोमदेशेआथर्वरागगृह्योक्तेनाव्यसक्ष्वे
त्येद्शांतिप्रयोगलिखितेनप्रकारेणाग्निस्थापनादिसप्तदशाहुत्यामकाभ्यांतानहोमंतानिअष्टपर्णगानिकृत्वाशमी
रवमर्यस्वस्त्ययनापुष्या २ भया ४ पराजिताख्यैः पंचभिर्गणैस्तोरथर्वणपरिशिष्टोक्तैरष्टोत्तरशतंजुहुयात्। तेनगणाष्टकसंतो। हो
मदेशस्थापितेहैमकलशेचसंपातान्निक्षिपेत्। राजाचसितचंदनपुष्पवासः सर्वालंकारयुतोग्नेर्दक्षिणतो। उपविश्य
सांवत्सरप्रभृतिभिर्द्विजैः सदस्यमुख्यैः पुरोहितेश्चहूयमानाग्नेर्निमित्तानिपश्येत्। तानिचनिमित्तानिग्रमारणनिर्णयेप्र
दक्षिणावर्त्तशिखइत्यादिनोक्तानि। एवंपुरोहितैः प्रधानहोमंसमाप्यद्रुतान्युक्तेनैवप्रकारेणसदादशाहुत्यात्यकाभ्यांता
नहोमादिब्रह्मोत्थापननमस्कारांतोरमुष्यांगानिकृत्वासुगंधतैलादिनास्वेच्छयाहुतस्नानंस्नानशालायामानीयासन

नी॰म॰
१२

रूपवेश्यपमृद्भिः स्नापयेत्। तत्रास हस्त्यश्वेति पर्वताग्रमृदा शिरः। अश्वत्थामेति वल्मीकमृदा कर्णौ। तेनैव विष्णुर्वालयमृ
दा मुखं। ग्रीवामप्स्वन्तरिति दूर्वास्थानमृदा ग्रीवां। अंत्रैरप्स्वन्तरिति राजांगणमृदा हृदयं। यस्य विश्वानि हस्तयोरिति गजदंतोद्धृतमृ
दा हस्तौ। रावामभुजौ। वह्निर्नो पितेति तिसरोमृदा पृष्ठं॥ नाभानाभिरिति संगममृदोदरं। त्राते सिंचामीति नदीकूलद्वयमृदा पार्श्वौ।
सोमा नमस्वराणामिति वेश्याद्वारमृदा कटिं। ऊरूभ्यामिति गजस्थानमृदोरू। मे हनाद्दूलमिति गोष्ठमृदा जानुनी। तेनैवाश्वस्था
नमृदा जंघे। एतावानस्येति रथचक्रोद्धृतमृदा पादौ। अंगादंगादिति सर्वमृद्भिः सर्वांगानि। ततः पूर्वस्थापितेन पंचगव्यपूतजले
कुंभेन स्नापयेत्। मंत्रास्तु। गंधद्वारामाप्यायस्व दधिक्राव्णः तेजोसि शुक्रं। आपो हि ष्ठेत्याद्याश्च। तद्वारा जात दास नेत्य स्वकाभ
द्रे स्नानउपविशेत्। भद्रासनं तु हेमं राजतं ताम्रं वा दारुजं वा मांडलिकस्य हस्तेनोच्चमायतं च। अनंतरं ततः स्याद हस्तेन।
महाराजस्य सार्धहस्तेन। ततो विप्रामात्यस्तेजोसीति पूर्वस्थापितेन घृतपूर्णहेमकुंभेन प्राच्यां स्थित्वाभिषिंचेत्। क्षत्रिया
मात्यो आप्यायस्वेति दुग्धपूर्णेन रौप्यकुंभेन दक्षिणातः स्थित्वा। वैश्यामात्यो दधिक्राव्णेति दधिपूर्णेन ताम्रकुंभेन पश्चि
मतः स्थित्वा। शूद्रो गामात्यो मधुवाता इति तत्रचेन मधुपूर्णेन मृत्कुंभेनोत्तरतः स्थित्वा सप्तच देवस्य त्वेति कुशोदकपूर्णेन मृत्कुंभेन
तत्रैव स्थित्वा। देवस्य त्वेत्यस्यांते अभिषिंचामीति वाक्यशेषः। ततः पुरोहितोग्निरस्त्वध्वमिति सदस्यान्प्रेपात [illegible] मकुंभेन राज

राम
१२

स्याभिषेकमंत्रैरभिषिंचेत्। तेच याजुषास्तावत्। सोमस्य त्वा द्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसा सूर्यस्य। तेनेंद्रस्येंद्रियेणाक्ष
त्राणां क्षत्रपतिरेध्यति दिद्यून्पाहि इमं देवा असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायें
द्रस्येंद्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वो मी राजा सोमोस्माकं ब्राह्मणानां राजेति। इममित्यस्य सूक्तेन द्वितीयांतं
राज्ञो नामामुष्येत्यत्र षष्ठ्यंतं तत्पितुः अमुष्या इत्यत्र षष्ठ्यंतं तन्मातुः इमा आपः शिवतमा इति। तच्च आग्र्वेदिकः देवस्य त्वा
वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि इति यजुः। भूर्भुवः
स्वरिति व्याहृतयश्च। एवमन्येपि तत्र स्थाः स्वीयाः बोध्याः। ततः पुरोहितो वह्निसमीपं गच्छेत्। ततो वेदशास्त्राभिज्ञोन्यो विप्रोभ
द्रासनगतमेव राजानं शतच्छिद्रसौवर्णकुंभेनाभिषिंचेत्। तत्र या ओषधीरिति सर्वौषधीनामुदकं क्षिपेत्। रथ्येति यजुषा स्र
क्तेन गंधस्योदकं। आब्रह्मन् ब्राह्मण इति यजुषा वीजानां। पुष्पवतीत्यथर्वणमंत्रेण पुष्पाणां। तेनैव मंत्रेणानेक फलानां।
आशुः शिशान इति सूक्तेन रत्नानां। ये देवाः पुरःसद इति कुशामुदकेन। केचित्तु कुश दूर्वा पल्लवैरनेन मंत्रेणांगानि मार्जये
दित्याहुः। ततोन्य ऋग्वेदी विप्रो गोरोचनया गंधद्वारेति मंत्रेण राज्ञः शिरः कंठं च लिंपेत्। ततः समीचीना विप्राः क्षत्रिया वैश्याः शूद्रा
अनुलोमाश्च यथालाभं गंगायमुनाद्यनेक नदी सरः कूप चतुःसमुद्र निर्झर जल पूर्णैः पूर्वस्यादितेनेक कलशैः वादकाः शंखभेर्यादि नि

वादयेयु:। विप्रा मंत्रपाठं वंदिनश्च स्तुतिं कुर्यु:। ततः सांवत्सरः सर्वकुंभमध्यस्थआसादितहेमकुंभोदकं कुशैर्गृहीत्वा वक्ष्यमाणैः सु
नी॰म॰ १३ रास्त्वामभिषिंचंत्वित्यादिभिरशीत्यधिकशतैः श्लोकैरभिषिंचेन्मंत्रांते मंत्रास्तु अभिषिंचंत्विति क्रियापदानुसारेणोक्तसार्द्ध
13 द्वित्रिश्लोकात्मका शेषाः। सर्वमंत्रांते सर्वतत्कलशस्थं जलं क्षिपेत्। ते च श्लोकाः समाप्तौ वक्ष्यंते। ततो राजा सुगंधितैलोद्वर्तनैः शु
द्धोदकैः स्नात्वा श्वेतोष्णीषादिवस्त्राणि धृत्वा दर्शे आज्ये च प्रतिबिंबं दृष्ट्वा तदाज्यपात्रं ससुवर्णं ब्राह्मणाय दत्वा चंदनकुंकु
मदधिदूर्वादिमंगलद्रव्याण्यालभ्य श्रीविष्णुसुवर्णादिप्रतिमां पांसुरूपमंडलेन्द्रतपुंजे वा षोडशोपचारैः ब्राह्मणान्वस्त्रालंका
रादिभिः सांवत्सरपुरोहितौ च मधुपर्कवस्त्रालंकारादिभिः पूजयेत्। अथ दैवज्ञः प्रागुक्तलग्ने राज्ञां पदं ललाटे हेमकुंडं चमरीर्वि
ञ्जीयात्। ततः पुरोधा राजानं शुभलग्ने उत्तरोत्तरक्रमेण वृषमार्जारतमस्त्वसिंहव्याघ्रचर्मबहुमूल्यवस्त्रोत्तरच्छदेन चोपर्युपर्या
स्तीर्णे दिते मंच उपवेशयेत्। ततो द्वारपालस्तत्रोपविष्टाय राज्ञे अमात्यान्पौरान्वारीजनः प्रकृतीश्च क्रमेणादर्शयेत्। राजा तु ग्रामवासो
गजाश्वसुवर्णगोजाविगृहैरभिषेचकौ सांवत्सपुरोहितौ संपूज्य ऋग्यजुःसामविदः त्रीन्विप्रांस्तथैव संपूज्यान्यांश्च ज्योतिर्विदः राम
पुरोहितं विप्रमुख्यांश्च यथाविभवं संपूज्य गोरससमोदकादिभिः संभोज्य गोवस्त्रतिलरूप्यान्नफलहेमसुपुष्पभूम्यादीनि तेभ्यो. १३
दत्वा चंदनकेसरादिभिरलंकृतो दध्यादूर्वादीनि मंगलद्रव्याण्यालभ्य सशरचापहस्तोऽग्निं प्रदक्षिणीकृत्य ... त्वा महाध्वजं ग

चमवत्सांपृष्टदेशेस्पृशेत्। ततः पुरोधाः सलिलं राजानं त्वश्वं महागजं चैव तत्रानाय्य ततो सर्वौषधिक[illegible] षधीरि
ति संस्नाप्य च सत्त्वर्यतः। स्नुवर्णरूप्याल्लेकारादिभिरलंकृत्य अश्वं राज्ञः पुरतस्त्वानीयाभिमंत्रयेत्। तत्र मंत्रः अश्वशांतौ। जया
श्व लेभमयरा ज्ञस्त्वं गाघः प्रतिष्ठितः स्मराघलक्ष्म्याः पुत्रस्त्वं गंधर्व त्वं तथा स्मर। यथा नराणामयं राजा तथा त्वं भव वाजिनां। य
था भवं तेन्र पतिर्नित्यमेवाकृत्ताति। न थात्वं राजानं सर्वं विस्तृतं गतं हृपादर्शयाश्वतथा स्वभेदिकदोषमकृपा गतं। तुरगान्सकलान्
रक्ष त्वमपि भारोपमर्पितः। अघप्रभ तिराज्ञा त्वामग्रेणाभ्येतिम क्षितः अभ्यर्चयिष्यति सदा गंधमाल्यानुलेपनैः। अश्वी भि
श्च द्विजातीनीतथा च स्वस्तिवाचनैः। रक्षतु त्वां महेंद्रः [illegible] सर्वैरासि दशाधिपः। हन्ति तोनयमो देवः पश्चिमेनजलाधिपः।
उदग्धैश्रवणो देवः सर्वैरक्षंतु सर्वतः। इति ॥ ततो गजमपि दक्षिणे कर्णे देवविदां मंत्रितं राजाभ्यो हि हेत। तन्मंत्रास्तु गजशां
त्यक्ताः। श्रीगजस्त्वं कृतो राज्ञा भवतस्य गजाग्रणीः गंधमाल्यान्नेभक्ष्यैस्त्वां पूजयिष्यति पार्थिवः। लोकः सदा भयं पूजां करि
ष्यति यथा तव। पालनीयस्त्वया राजा युद्धे ध्वनितथा गृहे। नियग्भावं समुत्सृज्य दिव्यभावमनुस्मर। देवासुरे पुरा युद्धे श्री
गजास्त्रिदशैः कृतः। ऐरावतः सुतः श्रीमान रिष्टो नाम वारणाः श्रीगजानां प्रपन्नेन सर्वमेवोपतिष्ठतु। जले जस्त्र वनगों दिव्यभाव
समनुष्ठितं। उपतिष्ठतु भद्रं ते रक्ष्या राजानमाह वद इति। अथ राजानं गजमारूह्य गजा हूदे देव मुख्यामात्यसामंतसांवत्सरपुरोहितादिभिः

स हमहापथेन स्वपुरं परिभ्रम्य देवातायतनानि गत्वा यथाविभवं देवताः संपूज्य गजारूढो गजारूढैरेवतैः सह गृहमागत्य गजाद्
नी॰म॰ १४ वतीर्य गजाद्वतीर्णो रोरिमान्याद्भिः सह हांतर्गृहं प्रविश्य तान्सर्वान्यांश्च लोकान्यथाविभवं दानमानसत्कारप्रियवचोभिः स
त्कृत्य कोटिलक्षान्युतान्यतमसंख्यया विप्रान्संभोज्य दीनान्धेभ्यो भूपसीदश्वेरां दत्वा स्वस्तिवाचनं कारयित्वा सर्वान्नि
विसृज्य स्वसुहृदादिपुत्रोगति दृढमना ... इति पुत्राः शर्मविमर्दिगणाः यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यथः एवा
मे प्राण मा बिभेः यथाहश्च रात्री च न बिभीतो न रिष्यथः एवा मे। २ यथा सूर्यश्च चंद्रश्च ... एवा मे। ३ यथा ब्रह्म च क्षत्रं च
यथा सत्यं चानृतं च यथा भूतं च भव्यं च ... पातो मृत्योर्मा यातं स्वाहा। द्यावापृथिवी उपश्रुत्या मा। सूर्य चक्षुषा
मा पाहि। अग्ने वैश्वानर विश्वैर्मा देवैः पाहि। विश्वंभर विश्वेन मा भरसा पाहि। ५। ३० नोस्यो जोमेदाः स्वाहाः सहोसि
सहो मे दा। बलमसि बलं मे दाः आयुरस्यायुर्मे दाः श्रोत्रमसि श्रोत्रं मे दाः चक्षुरसि चक्षुर्मे दाः परिपाणमसि परिपाणं
मे दाः ११ तुभ्यमेव जरिमन्वर्धतामयं मेममन्ये मृत्यवो हिंसिषुः शतं ये। मातेव पुत्रं प्रमना उपस्थे मित्र एनं मित्रियात्पात्वंहसः राम॰
मित्र एनं वरुणो मा रिशादा जरामृत्युं कृणुतां संविदानौ। तदग्निर्होता वयुनानि विद्वान्विश्वा देवानां जनिमा विवक्ति। त्वमीशिषे १४
पशूनां पार्थिवानां ये जाता उत वा ये जनित्राः मेमं प्राणो हासीन्मो अपानो मेमं मित्रा वधिषुर्मो अमित्राः द्यौ... ष्पिता पृथिवी माता

जरामृत्युंकृणुतांसंविदाने।यथाजीवाअदितेरुपस्थेप्राणापानाभ्यांगुपितःशतंहिमाः।इममग्नआ[illegible]वर्चसेनयप्रियं
रेतोवरुणमित्र।मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत्।अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकाद
धि।यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते।ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात्।यक्ष्मंदोषण्यमंसा
भ्यांबाहुभ्यांविवृहामिते।हृदयात्तेपरिक्लोम्नोहलीक्ष्णात्पार्श्वाभ्यां।यक्ष्मंमतस्नाभ्यांप्लीह्नोयक्नस्तेविवृहामसि।आन्त्रे
भ्यस्तेगुदाभ्योवनिष्ठोरुदरादधि।यक्ष्मंकुक्षिभ्यांप्लाशेर्नाभ्याविवृहामिते।ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां।यक्ष्मं
भसद्यंश्रोणिभ्यांभासदंभंससोविवृहामिते।अस्थिभ्यस्तेमज्जभ्यःस्नावभ्योधमनिभ्यः।यक्ष्मंपाणिभ्यामंगुलिभ्योनखेभ्यो
विवृहामिते।६।अंगेअंगेलोम्निलोम्नियस्तेपर्वणिपर्वणि।यक्ष्मंत्वचस्यंतेवयंकश्यपस्यवीबर्हेणविष्वंचंविवृहामसि।७॥
मुंचामित्वाहविषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात्।ग्राहिर्जग्राहयद्येतदेनंतस्याइन्द्राग्नीप्रमुमुक्तमेनं।यदिक्षि
तायुर्यदिवापरेतोयदिमृत्योरन्तिकंनीतएव।तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय।१।सहस्राक्षेणशतवीर्ये
णशतायुषाहविषाहार्षमेनं।इन्द्रोयथैनंशरदोनयात्यतिविश्वस्यदुरितस्यपारं।शतंजीवशरदोवर्धमानःशतंहेमन्तान्शतमु
वसंतान्शतंतइन्द्रोसविताअग्निःसविताबृहस्पतिशतायुषाहविषाहार्षमेनं।प्रविशतंप्राणापानावनड्वाहाविवव्रजं।वस्येपंतुम



नी॰म॰ १५

त्यवोयाना हुरितरान्त्रशतं ।५। इहैव स्तं प्राणापानौ मापगातमितो युवं । शरीरमस्यांगानि जरसे वहतं पुनः जरायै त्वा परि ददामि जरा
यै नि धुवामि त्वा। जरा त्वा भद्रा नेष्ट व्यन्ये यंतु मृत्यवो यानाहुरितरान्त्र्छतं । उत देवा अवहितं देवा उन्नयथा पुनः उतागश्चकुषं दे
वा देवा जीवयथा पुनः। द्वाविमौ वातौ वात आ सिंधोरा परावतः। दक्षं ते अन्य आवातु व्यन्यो वातु यद्रपः। आ वात वाहि भेषजं वि वा
त वाहि यद्रपः। त्वं हि विश्वभेषज देवानां दूत ईयसे॥ त्रायंतामिमं देवास्त्रायतां मरुतां गणाः। त्रायंतां विश्वा भूतानि यथा
यमरपा असत्। आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः। दक्षं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते। अयं मे हस्तो भगवा
नयं मे भगवत्तरः। अयं मे विश्वभेषजोयं शिवाभिमर्शनः। हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी। अनामयित्नुभ्यां हस्ताभ्यां
ताभ्यां त्वाभिमृशामसि। आवतस्त आवतः परावतस्त आवतः इहैव भव मानु गा मा पूर्वाननु गाः पितॄन सुवं बध्नामि ते दृढं। यस्त्वा
भिचेरुः पुरुषः स्वो यदरणो जनः। उन्मोचनप्रमोचने उभे वाचा वदामि ते। यद्दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या। उन्मोपदेन
सोमात्रकृताच्छेषपितकृताच्चुयत। उन्मो। यत्ते माता यत्ते पिता जामि भ्रीता च सर्जतः प्रत्यक् सेवस्व भेषजं जरदष्टिं कृ राम १५
णोमि त्वा। इहैधि पुरुष सर्वेण मनसा सह। दूतौ यमस्य मानु गा अधि जीवपुरा इहि। अनुहूतः पुनरेहि विद्वानुदयनं पथः
आरोहणमाक्रमणं जीवतोजीवतोयनं। मा त्वा भेनीमरिष्यसि जरदष्टिं कृणोमि त्वा। निर्वोचमहं यक्ष्ममंग  चरंतवाङ्गगभरे

ऋंगज्वरो यश्च ते हृदयामयः। यक्ष्म श्येनइव प्रापप्तद्वाचा साढः परस्तरां। ऋषीवोधप्रतीवोधावस्वप्नोयश्च जागृविः।
तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृतां। अयमग्निरुपसद्य इह सूर्य उदेतु ते। उदेहि मृत्योर्गंभीरात्कृष्णाच्चित्तमसस्प
रि। नमो यमाय नमोस्तु मृत्यवे नमः पितृभ्य उत येनयंति। उत्पारणस्य यो वेद तमग्निं पुरो दधेस्मा अरिष्टतातये।
ऐतु प्राण ऐतु मन ऐतु चक्षुरथो बलं। शरीरमस्य संविदां तत्पद्भ्यां प्रतितिष्ठतु। प्राणेनाग्ने संसृज त्वं धातः प्राणेन
संहितः। प्राणो न विक्ष्यतो मुखं सूर्यं देवा अजयन्न आपुषायुः कृतां जीवा पुरुषान्जीव मा मृथाः। प्राणेनात्मन्वतां जी
वा मा मृत्योरुदकावरां। देवानां निहितं निधिं समिद्धेन्नविंदत्पथिभिर्देवयानैः। आयो हिरण्यं तयुपुष्कि दद्भिस्तास्त्वा
रक्षंतु त्विरतास्त्रिवृद्धिः। त्रीन्नाकास्त्रीन्समुद्रांस्त्रीन्ब्रध्नांस्त्रीन्वैष्टपास्त्रीन्मातरिश्वनस्त्रीन्सूर्यान्गोप्तॄन्कल्पयामि ते।
उप प्रियं पनिप्नतं युवानमाहुतीवृधः। अगन्म बिभ्रतो नमो दीर्घमायुः कृणोतु मे। त्वं तकायमत्यवेनमः प्राणापाना इह तेर
मंतां। इहायमस्तु पुरुषः सहासुना सूर्यस्य भागे अमृतस्य लोके। उदेनं भगो अग्रभीदुदेनं सोमो अंशुमान्। उदेनं मरुतो दे
वा उदिंद्राग्नी स्वस्तये। इह तेसुरिह प्राण इहायुरिह ते मनः। उत्वा निर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि। उत्क्रामातः
पुरुष मावपत्थाम मृत्योः पड्वीशमवमुंचमानः। मा च्छित्था अस्माल्लोकादग्नेः सूर्यस्य संदृशः। तुभ्यं वातः पवतां मातरिश्वा तु भ्यं

नीम वर्षीत्वमन्तान्यायः। सूर्यस्त्वेत न्वेश शं तपाति त्वां मृत्युद्यितां का प्रमेष्ठाः। उद्यानं ते पुरुष नावयानं जीवातुं ते दक्षतातिं कृणोमि।
१६ आहि रोम ममृतं सुखं रथमथ जिर्विर्विदथमवदासि। माते मनस्तत्र गान्मा तिरोभून्मा जीवेभ्यः प्रमदो मानुगाः पितॄन्। वि
श्वेदेवा अभिरक्षन्तु त्वेहा। मा गतानामा दीधीथा ये नयन्ति परावतं।।७।। आरोह तमसो ज्योतिरेह्याते हस्तौ रभामहे। श्यामश्च
16 त्वा मा शबलश्च प्रेषितौ यमस्य यौ पथिरक्षी श्वानौ। अर्वाङेहि मा विदीध्यो मात्र तिष्ठः पराङ्मनाः। मेमं पन्थामनुगा भीम ए
षयेन पूर्वं नेयथ तं ब्रवीमि। तम एतत्पुरुष मा प्र पत्था भयं परस्तादभयं ते अर्वाक्।।२०।। द्विपद्धाः रक्षन्तु त्वाग्नयो ये अ
प्स्वन्ता रक्षन्तु त्वा मनुष्या यमिन्धते। वैश्वानरो रक्षतु जातवेदा दिव्यस्त्वा मा प्रधाग्विद्युता सह। मा त्वा क्रव्यादभि मंस्ता
रात्संकसुकाच्चर। रक्षतु त्वा द्यौ रक्षतु पृथिवी सूर्यश्च त्वा रक्षतां चन्द्रमाश्च। अन्तरिक्षं रक्षतु देवहेत्याः। बोधश्च त्वा प्र
तीबोधश्च रक्षतामस्वप्नश्च त्वानवद्राणश्च रक्षतां। गोपायंश्च त्वा जागृविश्च रक्षतां। ते त्वा रक्षन्तु ते त्वा गोपायन्तु तेभ्यो न
मस्तेभ्यः स्वाहा। जीवेभ्यस्त्वा समुदे वायुरिन्द्रो धाता दधातु सविता त्रायमाणः। मा त्वा प्राणो बलं हासीदसुं तेनु ह्वयामसि। राम
मा त्वा जंभः संहनुर्मा तमो विदन्मा जिह्वा बर्हिः प्रमयुः कथा स्याः। उत्त्वादित्या वसवो भरन्तूदिन्द्राग्नी स्वस्तये। उत्त्वा द्यौरुत्पृथि १६
व्युत्प्रजापतिरग्रवीत्। उत्त्वा मृत्योरोषधयः सोमराज्ञीरपीपरन्। अयं देवा इहैवास्त्वयं मामुत्र गादित[illegible]प सहस्रवीर्येण
